संस्कृत वेदांत 2403

क्र. ८.२२

8६8/93 गीताफलश्रुति

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

श्रीरामोजयति॥अथगीताफलश्रुतिप्रारंभः॥ॐ॥कृष्णंकमल
पत्राक्षंपुण्यश्रवणकीर्तनं॥वासुदेवंजगद्योनिंनौमिनारायणं
हरिं॥१॥कृष्णायवासुदेवायहरयेपरमात्मने॥प्रणतःक्लेशना
शायगोविंदायनमोनमः॥२॥वसुदेवसुतंदेवंकंसचाणूरम
र्दनं॥देवकीपरमानंदंकृष्णंवंदेजगद्गुरुं॥३॥गीतासुगीता ॥रामः॥
कर्तव्याकिमन्यैःशास्त्रसंग्रहैः॥यास्वयंपद्मनाभस्यमुख ॥१॥
पद्माद्विनिःसृता॥४॥अष्टादशपुराणानिकर्तव्याकारणानि

Rajawade Sanshodhak Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(५)

च॥उन्मथ्यचतुरोवेदान्मुनिनाभारतंकृतं॥५॥भारतोदधिकं
तस्यगीतानिर्मथनस्यच॥सारमुद्धृत्यकृष्णेनअर्जुनस्यमुखे
हुतं॥६॥भारतामृतसर्वस्वंविष्णोर्वक्राद्विनिःसृतं॥गीताज्ञा
नोदकंपीत्वापुनर्जन्मनविद्यते॥७॥गंगागीताचगायत्रीगोविं
दोत्हृदिसंस्थितः॥चतुर्गकारसंयुक्तःपुनर्जन्मनविद्यते॥८॥गी
ताशास्त्रमिदंपुण्यंयःपठेत्सततंपुमान्॥विष्णोस्तत्पदमाप्नोतिभ
यशोकविवर्जितं॥९॥नारायणंभजंतेवैसततंश्रद्धयान्वितं॥नतेषा

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(२)

गी·फ·
॥२॥

मस्तुभंकिंचित्स्वप्नांतेपिकदाचन॥१०॥मलनिर्मोचनंपुंसांजलस्ना
नंदिनेदिने॥सकृद्गीतांभसिस्नानंसंसारमलमोचनं॥११॥श्लोकैकै
कंधतराष्ट्रस्यनवंदुर्योधनस्यच॥द्वात्रिंशत्संज्ञेयप्रोक्तावेदाष्टावर्ज्जे
नस्यच॥१२॥तत्वनिर्बोधवेदाश्चपंचकेशवनिर्मिताः॥एवंगी
ताप्रमाणंचश्लोकानिशतसप्तकं॥१३॥पादंवाचार्धपादंवाश्लो
कंवाचाईमेवच॥नित्यंयःश्रावयाद्धतुसमोक्षमधिगच्छति॥१४॥
गीताशास्त्रमिदंशास्त्रंगीतासारसमुच्चये॥इदंशास्त्रमिदंप्रोक्तं

॥रामः॥
॥२॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

गुत्थ्यवेदार्थविस्तरं ॥ १५ ॥ एतत्पुण्यंपापहरंध्यानंदुष्टप्रणाशनं
॥ पठतांशृण्वतांचापिविष्णुमाहात्म्यमुत्तमं ॥ १६ ॥ कृष्णवृक्षसमु
द्भूतागीतानामहरीतकी ॥ साजनैःकिंनखाद्यंतेकलौमलविरोच
नि ॥ १७ ॥ गीतासहस्रनामैवस्तवराजमनुस्मृतिः ॥ गजेंद्रमोक्ष
णंचैवपंचरत्नानिभारते ॥ १८ ॥ एतानिपंचरत्नानिभारतोक्तानि
यानिवै ॥ यस्यकुक्षौस्वववर्तंतेनसवैनारायणःस्मृतः ॥ १९ ॥ सर्वदेवम
यीगीतासर्वशास्त्रमयोमनुः ॥ सर्वतीर्थमयीगंगासर्वदेवमयोहरिः

Joint property of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3)

गी·फ· ॥३॥

॥२०॥ सर्वधर्मबहिर्भूतो भुंजानो वाऽन्नसत्तन: ॥ कदाचिंनरकं दु:
खंगीताध्यायीन पश्यति ॥२१॥ ॥इतिश्रीगीताफलश्रुतीस
मास: ॥ ॥ पदक्षरपदभ्रष्टंमात्राहीनंतुयद्भवेत् ॥ तत्सर्वंक्षम्य
तांदेवप्रसीदरघुनंदन ॥१॥ विसर्गबिंदुमात्राणि पदपादाक्षराणि
च ॥ न्यूनानिचातिरिक्तानि क्षमस्वरघुनंदन ॥२॥ ॥ ॥ ॥ ॥ ॥ ॥राम:॥
श्रीमत्सीतारामचंद्रार्पणमस्तु ॥ शके १८०७ पार्थिवनाम माघशु ॥३॥
द्ध १२ भौमे समाप्त: ॥ मारुलकरराम कृष्णेन लिखितं ॥ श्रीर्जयति ॥

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com